Shri Raghunath Temple MSS. Library,
JAMMU

No. १५७६

Title गादाधर्या सामान्य निरुक्तिः

Author ×

Extent २६ Age ×

Subject न्याय वैशेषिकं

तादार्थ्ये सामान्यनिरुक्तिः

१५७६

२६५०

॥सामान्यनिरुक्तिप्रारंभः पत्रे २२

स्मरणाद्युत्तरं

॥श्रीगणेशाय नमः॥ हेत्वाभासनिरूपणे प्रसंगस्यापि संगतित्वं संभवति । व्याप्तिपक्षधर्मतावि
शिष्टहेतुनिरूपणे सति व्याप्तिपक्षधर्मताविरोधितद्विरहवतो दुष्टहेतोस्तत्प्रदर्शकमूलस्य
न्यूनतां परिजिहीर्षुः प्रसंगस्यापि तन्निरूपणप्रयोजकत्वमाह । एतावतेति परिष्कृतव्या
प्तिपक्षधर्मते निरूपिते सति तदुत्क्रमेण दुष्टहेतोस्स्मृतेः । तस्य प्रसंगनिर्वाहकस्य लाभाय
तं तत्प्रसंगादिति सपरिकरहेतुनिरूपितप्रसंगसंगतेरित्यर्थः । तज्ज्ञानजन्यजिज्ञासाधीनत्वं
चेत्यर्थः । अन्वयश्चास्य निरूपणमित्यनेन तत्त्वनिर्णयविजयप्रयोजकत्वादित्यमूलं यद्यपि हे
त्वाभासनिष्ठतत्त्वनिर्णयादिजनकज्ञानविषयकत्वार्थकतया शिष्यप्रवृत्त्युपयोगि निरूप १
णघटकज्ञानप्रयोजनप्रदर्शनपरम् । तथापि तन्मात्रपरत्वे संगत्यप्रदर्शने विव

न्यूनतास्यादित्यनेनास्य एककार्यकारित्वरूपसंगतिप्रदर्शनपरत्वमपि संभवतीति स्फुटीकर्तुमाह तत्त्वनिर्णयादीति
आदिपदाद्विजयादिपरिग्रहः तत्कार्यकारित्वात् सपरिकरहेतुप्रयोज्यकार्यप्रयोजकत्वात् प्रयोजकत्वं च जनक
तावच्छेदकादिसाधारणम् अनन्यस्व विषयकज्ञानकार्यप्रतिरूपस्य तथात्वमक्षतमेव तत्त्वनिर्णयः अमितिकोटिनि
श्चयः तत्र व्याप्तिपक्षधर्मताविशिष्टप्रकृतहेतुज्ञानमिव तद्विपरीतकोटिसाधकस्य हेत्वाभासत्व
ज्ञानमप्युपयुज्यते प्रतिबंधकीभूतविपरीतकोटिव्याप्यवत्ताज्ञाने अप्रामाण्यग्राहकत्वादिस्तु न
योऽस्तत्वान्निर्णयप्रयोजकत्वेम् अथवा तत्त्वनिर्णयः साध्यवत्ताज्ञाने प्रमात्व निश्चयः तत्रानुमा
पकहेतौ व्याप्त्यादिविशिष्टत्वरूपसद्धेतुत्वज्ञानमिव विपरीत साधकहेतौ दुष्टत्वज्ञानमप्युप कोटि
युज्यते प्रकृतसाध्यग्रहप्रामाण्यग्राहक विपरीतसाधकहेतु दुष्टत्वग्रहविघटकत्वात्

५ अवच्छेदकत्वान्न त्रसहेतावव्याप्तिः। यद्विषयकत्वेनैत्यादिलक्षणे तृतीया याः ५

विजयप्रयोजकत्वं च हेत्वाभासस्य स्वज्ञानाधीनपरोक्तहेतुदोषोद्भावनद्वारा व्याप्त्यादिविशिष्टहेतोः

स्वज्ञानाधीनस्त्या [redacted] यत्प्रयोगद्वारा बोधम् मूलोक्तलक्षणानां दुष्टहेतुलक्षणत्वे दोषे ष

२ त्वव्याप्तिः। यथार्थज्ञाननिष्ठानुमितिप्रतिबंधकतावच्छेदकविषयताश्रयत्वपर्यंतस्य समू

2 हालंबनज्ञानविषयताश्रयोदासीनपदार्थवारणाय प्रथमलक्षणे विवक्षिणीयतयाबाधो

द्विज्ञानप्रतिबंधकतायां प्रायशो हेतुविषयतायां अवच्छेदकत्वाकं थतिया सुतरां तथेत्यत आ

हयथाश्रुतमिति इदं एतल्लक्षणत्रयं। ननु हेतुवदाभासंत इति व्युत्पत्त्या हेत्वाभासपदस्य दुष्टहे २

तुपरत्वात् दुष्टहेतुनिरूपणस्यैव प्रतिज्ञातत्वात्तल्लक्षणमेवाकांक्षितं मतस्तदनुक्तौ मूलस्य न्यू

नता अन्यथा विधव्युत्पत्त्या हेत्वाभासपदस्य हेतुदोषपरत्वे संभवेपि तेन साध्यदुष्टहेतूनामे

वविभाजनात्तद्दुष्टहेतुनिरूपणस्याप्रतिज्ञानत्वेन तदसंगतेः । एवं दुष्टहेतुनिरूपणस्याप्रकृतत्वे दुष्टहेतूनां विभा
गानर्हतया दुष्टहेतूनां संकरेण विभागव्याघाताशंकाया अनवतारात् उपाधेयसंकरेपीत्यादिग्रंथ
स्य उपाध्यसंकरेण विभागोपपादनपरस्यासंगतिरित्यत आह तत्त्वं चेत्यादिना दोषवत्त्वे चेत्य
र्थः । दुष्टहेतूनां लक्षणमित्यनुषज्यते स्फुटमिति शेषः । तथा च दुष्टहेतुनिरूपणस्याप्रकृतत्वेपि दो प ४
षलक्षणे कृते दुष्टहेतुलक्षणं स्य स्फुटतया लाभेन न दोषलक्षणाभिधानस्य तत्र नासंगतिः
नोक्तानुपपत्तिरिति भावः तदभिप्रायेणैवेति दुष्टहेतुलक्षणाभिप्रायेणैवेत्यर्थः अनुमितिपदस्य
अनुमितिसामान्यपरत्वे अतिप्रसंगात् प्रकृतपक्षसाध्यहेतुकानुमितिपरत्वमावश्यकं तथा
च व्यभिचारादावव्याप्तिः वह्निधूमव्यभिचारीत्यादिज्ञानाभाववत्पर्वतो धूमवानित्याद्यनुमित्यज

३

नकत्वात् लक्षणयानस्यं तादृशानुमितिकारणज्ञानमात्रपरत्वेबाधादावव्याप्तिः बाधादिज्ञानस्यपराम
3 र्शाप्रतिबंधकत्वात्। अतोनुमितिपदमजहत्स्वार्थलक्षणया तदुभयपरतया व्याचष्टे। त
थेति। तादृशावाक्यइत्यर्थः। लक्षणघटकतावच्छेदकमुभयसाधारणमनुगतंरूपमाह।
अनुमितिनिष्ठकार्यतानिरूपिकसंबंधित्वेनेति। अनुमितिपदस्यपक्षतावच्छेदकविशिष्टक नसाध्यभावच्छे
दकावच्छिन्नकारकप्रकृतहेतु तावच्छेदकावच्छिन्नहेतुकानुमितिपरत्वस्य
ध्यं यमेवदर्शयितुंमिति। अतोनवक्ष्यमाणातिप्रसंगः। निरूपकत्वंचयद्यपिप्रतियोगित्वं
नदाकार्यस्य कार्यताप्रतियोगित्वाभावादनुमित्यसंग्रहः। अतःसंबंधिपदंतत्संबंधिद्वयसा
धारणस्यतत्साक्षात्कारजनकसाक्षात्कारजनकविषयात्मकनिरूपकस्यलाभा ३

का ता

यत्रपर्वतोवह्निमान्ह्रदश्चनतथाइत्यादिसमूहालंबनानुमित्यादिविरोधिह्रदनि-
ष्ठह्रदविरोधिवन्ह्यभावादिरूपबाधादेःपर्वतादौधूमादिनावन्ह्यादिसाधनेपरो
क्षताप्रसंगः।प्रकृतानुमितिनिष्ठकार्यतानिरूपकसंबंधित्वस्यकस्यापिप्रतिबध्यताव
च्छेदकतयातदवच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतानिवेशनासंभवात् तथाविधत्व ग्रहण
व्यापकप्रतिबध्यतानिवेशेचअनुमित्यविरोधिनिव्यभिचारादौपरामर्शविरोधिबाधादौचा ग्रहण
व्याप्तिःउभयविरोधिपक्षाप्र।सिध्यादवेवतादृशप्रतिबध्यतानिरूपकज्ञानविषयत्वसत्वाद
तःकल्पांतरमाह।साध्यव्याप्तेतिप्रकृतपक्षतावच्छेदकविशिष्टेपक्षेप्रकृतसाध्यतावच्छेदकावच्छिन्न
व्याप्तिविशिष्टप्रकृतहेतुतावच्छेदकावच्छिन्नप्रकारकानुमितिसामान्यपरमित्यर्थः।एवंचतादृशसमू

४ ह्यालंबनानुमितेर्व्याप्त्यादिविषयकतयाव्यभिचारादिप्रतिबध्यत्वात् नव्यभिचाराद्यसंग्रहः ह्रदादौ वह्न्यादिविष
५ यकसमूहालंबनादिप्रतिबंधकतामादाय दर्शितातिप्रसंगस्य वारणाय सामान्यपदम्॰। तथा च तादृशानु
मितित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताशालित्वं यथार्थज्ञानविषयत्वपर्यवसितोऽर्थः अत्र च साध्य
तावच्छेदकावच्छिन्नादिप्रकारकानुमितिसामान्यांतर्गतायां पर्वतो वह्निमान् वह्निव्याप्यधूमवानित्याद्य
नुमितौ ह्रदो न वह्निमान् भिन्नसाध्यक इत्यादिनिश्चयस्याप्रतिबंधकत्वात् तद्वारणं बोध्यम्॰। बाधसत्प्रतिप
क्षस्वरूपासिद्ध्याश्रयासिद्धिव्याप्त्यसिद्धिवारणाय प्रकृतपक्षतावच्छेदकावच्छिन्नविशेष्यकत्वनिवे पक्ष
शः। द्रव्यत्वादिना ह्रदादिविशेष्यकानुमितौ तथाविधनिश्चयस्याप्रतिबंधकत्वात् तद्दोषवनाद्दव
स्थ्यम्॰ अतः पक्षतावच्छेदकावच्छिन्नत्वोपादानं। अवच्छेदकत्वं च तत्पर्याप्त्यधिकरणत्वं।। तेना ४

तेजस्वी पर्वतो वह्निमानित्यादौ विशिष्टपर्वतत्वादिमति वह्न्याद्यभावस्य बाधस्य काञ्चनमयः पर्वतो वह्नि-
मानित्यादौ पक्षाप्रसिद्धेः शुद्धपर्वतसाध्यवच्छिन्नपक्षकानुमितिविरोधित्वेऽपि नासंग्रहः। एवमग्रे-
ऽपि बोध्यम्। साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकत्वाविशेषे परामर्शे विरोधितया बाधस-
त्प्रतिपक्षयोरव्याप्तिः। तत्र प्रकृतसाध्यतावच्छेदकावच्छिन्नत्वस्यानुपादानेऽपि न दोषस्तादृशस्य
वह्नित्वावच्छिन्नाभावादिनिश्चयस्य धूमजनकतेजस्वी वह्निव्याप्यधूमवांश्च ह्रद इत्याद्यनु-
मित्यप्रतिबन्धकत्वात्। साध्याप्रसिद्ध्यादावव्याप्तिवारणप्रयोजनकत्वं तदुपादानस्ये-
ति तु न सत् वह्निर्न काञ्चनमय इत्यादिनिर्णयस्य पक्षे शुद्धवह्नित्यादिना वह्न्याद्यनुमितिवि-
रोधित्वेऽपि द्वितीयदले प्रकृतसाध्यतावच्छेदकावच्छिन्नान्तर्भावसत्त्वात्। तस्य काञ्चनम

५

यवह्निव्याप्यधूमवानयंपर्वतइत्यनुमितिविरोधितयातत्रलक्षणागमनात्तद्द्वितीयदलम्
चेद्व्यभिचारविरोधसाधनाप्रसिद्धिस्वरूपासिद्धिषु नाव्याप्तिः तत्रापिसाध्यतावच्छे सि
5 दकावच्छिन्ननिरूपितव्याप्तिविशिष्टत्वनिवेशाद्व्यभिचारविरोधयोर्नाव्याप्तिः वह्नि
र्धूमव्यभिचारीत्यादिज्ञानदशायामपि द्रव्यत्वादिना धूमादिनिरूपितव्याप्तेर्भाने
संभवात्तद्दोषतादवस्थ्यमतो व्याप्तौ साध्यतावच्छेदकावच्छिन्नीयत्वप्रवेशः अत्र यु ८
न्वयव्याप्तिव्यतिरेकव्याप्तीविशिष्योपादायतदुभयविशिष्टहेतुप्रकारकत्व
मेवनिवेश्यं एकतरमात्रव्याप्त्युपादाने साधारण्यानुपसंहारित्वयोरेकतरा
गा संग्रहप्रसंगादित्यग्रे व्यक्तीभविष्यति॥ तादृशव्याप्तिद्वयप्रकारतानिरूपितहे ५
तुप्रकारतायास्तत्साध्यकेतद्धेतुकानुमितिजनकतावच्छेदकप्रकारतात्वेना

नुगमय्य निवेशस्तु न संभवति ।। साध्याभाववद्वृत्तित्वज्ञानदशायां केवलव्यतिरेकव्याप्त्यादिप्रकारकहेतुमत्ताज्ञा
नोत्पत्त्या साधारण्यादेस्तादृशप्रकारताशाल्यनुमितिसामान्यविरोधित्वाभावात् । व्याप्तिविशिष्टविष २८
यकत्वमात्रस्य तादृशहेतुतावच्छेदकावच्छिन्नत्वाभि । वृ यकत्वमात्रस्य वा निवेशोस्त्वरूपासिद्धा च व्याप्तिर
तः पक्षांशे तादृशव्याप्तिविशिष्टहेतुतावच्छेदकावच्छिन्नप्रकारकत्वनिवेशः पक्षांशे व्याप्तिविशिष्टहेतु
प्रकारकत्वमात्रनिवेशोचितः दोषतादवस्थ्यम् धूमाभाववान् ह्रद इत्यादिज्ञानस्य द्रव्यत्वादिना हेतुमत्ताज्ञा
नाविरोधित्वात् साधारण्यादावव्याप्तिश्च वह्नित्वाद्यवच्छिन्ने धूमाभाववद्वृत्तित्वग्रहस्य धूमादि
व्याप्तिविशिष्टत्वेन ह्यवृत्तित्वावच्छिन्नप्रकारकज्ञानाविरोधादतो हेतुतावच्छेदकावच्छिन्नत्वानिवे
शः पक्षांशे साध्यादिप्रकारस्य संस्कारादेरालर्यज्ञानस्य च बोधाद्विज्ञानाप्रतिबध्यत्वाद
संभवदुक्त्यतस्तादृशानुमितित्वे निवेशः ।। साध्यव्याप्यहेतुधर्मितावच्छेदकसाध्यवत्ता
व्यापकत्व

॥ज्ञानस्यैव साध्यव्याप्यहेतुमान्पक्षः साध्यवानित्याकारकतया तादृशाकारलिखनस्वारस्यात् तादृशहेतुविशिष्ट
पक्षतावच्छेदकावच्छिन्नविशेष्यकसाध्यतावच्छेदकावच्छिन्नप्रकारकानुमितित्वव्यापकप्रतिबध्य
तानिरूपितप्रतिबंधकत्वस्य लक्षणघटकत्वोपगमे पर्वतत्वावच्छेदेन वह्निसाध्यत्वेन तत्सामाना
धिकरण्येन साध्याभावादेरदोषत्वप्रसंगः । सामानाधिकरण्यमात्रावगाहिवाधादिज्ञानस्य
शुद्धपर्वतत्वावच्छेदेन वह्न्यादिज्ञानं प्रत्येव प्रतिबंधकतया धूमविशिष्टपर्वतत्वावच्छिन्नधर्मि
कवह्न्यादिज्ञानाप्रतिबंधकत्वादिति नाशंकनीयम् । न च विशेष्यतावच्छेदककोटौ धूमादे
रधिकस्य भानेपि शुद्धपर्वतत्वावच्छिन्नसंयोगादेर्यत्र संसर्गे नानन्तर पर्वतत्वसामानाधिक
रण्येन वह्न्यभावादिज्ञानस्य प्रतिबंधकत्वमावश्यकम् । तादृशानुमितेरपि शुद्धपर्वत
त्वावच्छेदेन वह्न्याद्यवगाहित्वादिति वाच्यम् । धर्मितावच्छेदकावच्छेदेन विशिष्ट ६

द्वोधर्मितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नत्वमेव संस
र्गांशे भासते तेन तु तद्देशावच्छिन्नत्वमपि तद्धर्मावच्छिन्नवि
विशेष्यतानिरूपिततद्देशव्यापकत्वावच्छिन्नसंसर्गत
याअज्ञाग्राणिकेत्वात् अपलिंगोपधानमतेहेतोः सर्वत्रैवध
र्मितावच्छेदकतयाभानादृतादृश संसर्गतानभ्युपगमआ
वश्यकोन्यथाशुद्धपर्वतत्वावच्छेदेन हेतुमत्ताज्ञानस्याले
हेतुविशिष्टपर्वतत्वावच्छिन्नसंयोगादिसंसर्गकानुमितेर
वाभ्युपगमेपर्वतत्वादिसामानाधिकरण्यमात्रावगाहिव्या
प्यादिग्रहकालेपितथाविधसाध्यनिश्चयवत्तोनुमित्या

6 पत्ते: न हि सामानाधिकरण्येन वाधसिध्योः सखौरनुमितिं कश्चिदु
7 पैति ताद्दृशवाधादिग्रहस्य क्वचिदप्यनुमितौप्रतिबंधकत्वासंभ
नै३ वात् तेषां हेत्वाभासताविलोपापत्तिश्चेतिचेत् एवमपि लिंगानुपधान
मते ताद्दृशविषयतायामौनाभाव एव प्रकृतग्रंथोपि न लिंगोप
धानमताभिप्रायकः। तन्मतेऽनुमितेः सर्वत्रैव तथाकारकतया ता
द्दृशाकारत्वस्याव्यावर्तकतयानुमितिपदस्य ताद्दृशाकारानु
मितिपरत्वस्य दर्शनासंगतेः केचित्तु लिंगानुपधानमतेनुमि
तिपदस्य तदुभयपरत्वं व्याख्याय लिंगोपधानमतेऽयथाश्रु ॥6॥
तापरतौ माश्रयते साध्यव्याप्यें [redacted] दिर्नाद्दृश्याकारकानुमि

निर्णीतव्यलिंगोपधानमते स्या

तिपदमनुमितेरित्याकारकतामनाभिप्रायकमितिव्याचक्षते व्याख्याप्रयोजनं स्फुटयति तेनेति। एकत्र
वह्नित्वाद्येकधर्मावच्छिन्नव्यभिचारादौ सत्यादिना स्वरूपासिद्धिपरिग्रहः॥ अन्यस्यपरामर्शात्व
तद्रूपहेत्वादिरूपापरधर्मावच्छिन्नेव्याप्तिपक्षधर्मताद्यवगाहिज्ञानात्व्यभिचारादित्यादिहे
तोरनुमित्यजनकत्वेपीत्यनेनसंबंधः। यत्रतद्रूपावच्छिन्नेव्यभिचारिज्ञानोत्पत्तिद्वितीयक्षणेक
थंचित्तद्रूपावच्छिन्नलिंगकपरामर्शस्तत्रैकक्षणविलंबेनानुमित्युपगमेव्यभिचारासंभवा
न्नतत्रव्यभिचारोदद्भावितः। ननुतद्धर्मावच्छिन्नलिंगकानुमितौतद्धर्मावच्छिन्नधर्मिकव्यभिचा
रज्ञानाभावस्यहेतुत्वोपगमान्नोव्यभिचारः। तद्धर्मावच्छिन्नलिंगकत्वंचाव्यवहितोत्त
रत्वसंबंधेनतद्रूपावच्छिन्नधर्मिकव्याप्त्यादिज्ञानविशिष्टत्वंतादृशसंबंधेनव्यभिचा

॥८॥
8

रज्ञानविशिष्टं यत्तदन्यत्वे तेनैवाजन्यतावच्छेदकें वाच्यं तेन धूमव्याप्यवह्निमानयमित्याकारकज्ञानाद्दि
परामर्शोत्पत्तिद्वितीयक्षणे यत्र लौकिकसन्निकर्षजन्यो धूमव्यभिचारी वह्नि धूमव्याप्यं धनवा
नित्याकारकसमूहालंबनयर्हेस्तत्र तज्जन्यानुमितेरुक्तसंबंधेन वह्नित्वावच्छिन्नधर्मिकव्या
प्यादिज्ञानविशिष्टत्वेपि नक्षतिरिति तथा च नायं व्यभिचार इत्यत आह व्याप्यादीति कृत
कारणताकव्याप्यादिज्ञानसत्वे व्यभिचारज्ञानाद्यभावव्यतिरेकेणानुमितिव्यतिरेकस्या
सिद्धत्वादितिभावः। व्याप्तिज्ञानादेर्व्यभिचारज्ञानाभावेनान्यथासिद्धत्वशंकाप्रागेव निराकृ
तानक्षतिः। नव्यभिचारादावव्याप्तिः। यत्रासद्धेतु विशेषेतादृशानुमितिरप्रसिद्धा तत्र तद्दो
षेषुव्या [illegible] सेर्वक्ष्यमाणतया एतादृशायथा श्रुतव्याख्यायां अनिर्भरसत्च नायं वद ॥८
तीति। पर्वतो वह्निमानित्यादि सद्धेतुस्थले बाधादिभ्रमविषयेति व्याप्तिवारकेन यायथा

न्यूम॥

य त्रि

॥ श्रुतेयथार्थपदंसाधर्म्ये ॥ इति पर्वतो निर्वह्निर्निर्वह्निरिति अत्रेतिपदस्य त्रितयस्य ले संबंधादुभ्रमत्रितयलाभः
प्रत्येकभ्रममादायैवातिप्रसंगसंभवात्तादृशसमूहालंबनभ्रमपर्यंतानुधावनं वैफल्यान्नत्स्वरत्वासंगतिरि
ति ध्येयम् ॰ प्रथमभ्रमोऽनुमितौ विरोधी अंत्यौ चजनकज्ञाने तयोरपि प्रथमे अन्यत्रप्रसिद्धस्य सा
ध्याभाववद्। वृत्तित्वस्य धर्मांशे द्वितीयभ्रमत्वे अंत्ये प्रमेयत्वाभाववद्वृत्तित्वस्याप्रसिध्यानन्तद्भ्रमत्वं किंतु
अभावांशे अनुयोगिता विशेषसंबंधेन साध्यस्य भ्रमत्वमित्येतादृश विशेषमादाय शिष्यबु
साद्गायानेक भ्रमकथनं इदं बोध्येयम् अभिधेयत्वं प्रमेयत्वस्य व्यभिचारी सच स्वरूपसंबंधावच्छि
न्नप्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन प्रमेयत्वस्य भ्रमो वाच्यः। प्रतियोगितांशे साध्य
तावच्छेदकधर्मावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नत्वयोस्साध्याभाववद्वृत्तित्वरूप
व्याप्तिघटकतया तदंशे तदुभयावगाहिव्यभिचारज्ञानस्यैव व्याप्तिज्ञानविरोधित्वात्। एवं च

॥९॥ भेदादौ प्रमेयत्वत्वावच्छिन्नप्रतियोगिताकत्वस्याप्रसिद्ध्या विषयरूपसंबंधावच्छिन्नतादृशप्रतियोगित्वाप्रसिद्ध्या
तादृशभ्रमानुपपत्तिः प्रतियोगित्वांशे संबंधविशेषावच्छिन्नत्वस्य भ्रमादपि न युक्तम् । तस्य संबं
९ धघटकतया तत्प्रकारकत्वघटितभ्रमस्यानुपपत्तेः न च तेन संबंधेन तेन रूपेण प्रतियोगिताप्र
कारक एवात्र भ्रमो विवक्षितः । ननु तदवच्छिन्नप्रतियोगिताकत्वसंसर्गक इति वाच्यम् लाघ
वात्प्रतियोगितासंसर्गकज्ञानस्यैवानुमितिहेतुतया तत्प्रकारकव्यभिचारज्ञानस्यापि किंचि
त्करत्वात् अत्राहुः । स्वावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वसंबंध
न साध्यतावच्छेदकवत्त्वमेवाभावस्य साध्याभाववदवृत्तित्वरूपव्याप्तिघटकं लाघवात् ॥
एवं च तादृशसंबंधेनाभावांशे साध्यतावच्छेदकप्रकारकव्यभिचारज्ञानस्य व्याप्तिग्रहवि
रोधितया घटत्वादेः प्रसिद्धेन तादृशसंबंधेन प्रमेयत्वादेरभावांशे भ्रमात्मके एव तथा ॥६॥
विधग्रहो विवक्षित इति न किंचिदनुपपन्नम् ० । प्रथमे साध्याभाववदवृत्तित्वज्ञाने विरो

। धिहेतौ साध्याभाववद्वृत्तित्वरूपस्य भ्रमः। द्वितीये च तदप्रसिद्ध्या व्यापकसामानाधिकरण्यग्रह विरोधि साध्यता
वच्छेदके हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्य भ्रमो भिमतः समानाकारकज्ञान
स्यैव विरोधितया द्विविधव्यभिचारसंग्रहाय द्विविधव्याप्तिविषयक समूहालंबन ज्ञानस्यैव ल
क्षणे निवेश्यत्वात् न च हेतुः साध्यस्य व्यभिचारी यत्र साध्यतावच्छेदके हेतुसमानाधिकरणा
भावप्रतियोगितावच्छेदकत्वस्य दुर्लभतया तद्वागगादि ज्ञानस्याभिधेयत्वप्रमेयत्वस्य व्यभिचारित्वा
कारकतानोपपद्यत इति वाच्यं। यतो अभाववद्वृत्तित्व समानाधिकरणाभावप्रतियोगिताव
वच्छेदकत्वं चेति द्वयमेव हेतुस्साध्यस्य व्यभिचारी यत्र व्यभिचारपदार्थः। तत्रादिम व्यभि
चारतात्पर्यकस्थले व्यभिचारपदार्थैकदेशे अभाव अनुयोगितारूपसम्बन्धपदस्य तत्र प्रकृत्य

10 र्थतावच्छेदकवह्नित्वाद्यवच्छिन्ननिरूपितत्वसंबंधेनप्रकृत्यर्थेस्यान्वयः मत्वर्थीयार्थः स्वरूपसंबंधवान्तस्यच
अभेदेनप्रथमांतार्थेन्वयः द्वितीयनत्पदार्थपरवाक्यस्थले चतदेकदेशसामानाधिकरण्ये हेतुपदार्थोन्वितत्र
धर्माधर्मिनिरूपितस्यस्यान्वयः षष्ठीप्रकृतेस्तद्धर्मपरतयासकलयेतार्थस्यसाध्यतावच्छेदकेनिरूपितस्यताद
शान्वयवत्वलभ्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वे। तस्यचतद्धिताधसंबंधे एक न ४
देशेघटत्वरूपसंबंधेसंबंधिनश्चाभेदेनप्रथमांतार्थेन्वयः। एवंचोक्तवाक्यात्तत्साध्यतावच्छेदके
हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वस्यापिलाभानत्रतदवगाहिभ्रमस्यदर्शितकार
तासंभवादित्यपिवदंतिन्त्रमादिति। पंचम्यर्थः प्रयोजकत्वंतस्यप्रतिबंधपदार्थेनुत्पादेन्वयः। यथार्थे १०
तीतियथार्थपदप्रदानेनस्वप्रअधिकरणप्रकारावच्छिन्नतापान्नविषयतानदनिरूपकत्वरूपस्य

सर्वांशेऽप्रमात्वस्य विवक्षणीयतया दर्शितप्रमाणं किंचिदंशेऽप्रमात्वेऽपि न तन्ना
दाय दोष इति भावः अत्र यथार्थपदेन सद्धेतुस्थले अनुमितिविरोधिप्रमाविष
यसाध्याभाववादावतिप्रसंगवारणेऽपि असद्धेतुस्थले तादृशप्रमाविषयदो
षघटकसाध्याभावादेः प्रत्येकं दोषत्वापत्तिर्दुर्वारैवेति तदर्थं प्रकारांत
रानुसरणे च तत एव पूर्वदोषस्यापि वारणसंभवे यथार्थपदं व्यर्थमिति
दोषस्य दुरुद्धरतया तस्यैव यथार्थपदापाटेत लक्षणांतरानुसरणबीजत्वमाह
नन्विति एकदेशस्यापि विशिष्टघटकतया हेत्वाभासपदार्थत्वस्य स्पष्टत्वादाह
प्रत्येकमिति प्रत्येकपदार्थपर्याप्तसंख्यावच्छेदकावच्छिन्नस्य स्वरूपतः हेत्वा
भासतापत्तिः हेत्वाभासपदार्थत्वापत्तिः यद्रूपावच्छिन्नज्ञानस्यानुमितिविरोधित्वं तद्रू

पावच्छिन्नेहेत्वाभासत्वव्यवहारस्य तद्रूपावच्छिन्नेमात्रज्ञानाद्धेतोर्दुष्टत्वव्यवहारस्य चानुदये न चेष्टापत्तिर्न संभ
११ वतीति भावः । याद्दशविशिष्टविषयकत्वं च ताद्दशानुमितिविरोधित्वानतिरिक्तवृत्तित्वमिति विवक्षया
न साध्याद्यावृत्तिव्याप्तिः इत्यत आशंकते अथेति । विशिष्टविषयकं साध्याभाववद्वृत्तिविशिष्टसा
धनादिविषयकमेव तद्धटकं च ताद्दशविशिष्टघटकप्रत्येकपदार्थविषयकत्वं च न विशिष्टं
न ताद्दशविशिष्टनिरूपितं तथा च प्रत्येकपदार्थविषयकत्वस्य प्रतिबंधकतानतिरिक्तवृ
त्तित्वान्नातिव्याप्तिरिति भावः । व्यर्थमिति यथार्थ्युदाहरणे विरुद्धहेतुस्य हेऽतिव्याप्तिवा
रणासंभवात् ननु तत्र भ्रमविषयकप्रत्येकपदार्थस्योक्तरीत्या वारणेपि तद्विशिष्टविष
ये अतिव्याप्तिरत आह भ्रमविषयेति अप्रसिद्धत्वादिति न तथा च क्वातिव्याप्तिरिति भा
वः । केचित्विति । नन्वस्वदुष्टहेतुलक्षणत्वे दोषे वेद्यतिव्याप्तिस्तेषामप्यनुमितिविरो ११

॥धियथार्थज्ञानविषयत्वात् न च ह्रदत्वावच्छिन्नपक्षक धूमादिसाध्यक स्थले वह्न्यभाववद्ध्रदादिरूपदोषाणामपि दुष्ट
हेतुत्वमिष्टमेवेति वाच्यं तद्रूपावच्छिन्नपक्षक तद्रूपावच्छिन्नसाध्यक तद्रूपावच्छिन्नहेतुक स्थले तेन रूपे
ण दुष्टस्य लक्षणं तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिविरोधियथार्थज्ञानविषयत्वमात्रेण त
दा ह्रदत्वावच्छिन्नपक्षक वह्नित्वावच्छिन्नसाध्यक धूमत्वावच्छिन्नहेतुकानुमितिप्रतिबंधक प्रमा
विषय वह्न्यभाववद्ध्रदादीनां धूमत्वादिनां दुष्टताभावात् अतिव्याप्तिरित्याशंकां परिजिहीर्षुस्ता
दृशाभावप्रतियोगिनां ज्ञानमिति षष्ठीसमासमाश्रित्य तादृशाभावप्रतियोगिप्रकारकयथा
र्थज्ञानविषयत्वमर्थं व्याख्यास्यति तत्र ज्ञायमानदोषप्रतिबंधकतामत एव संगच्छते तस्य नमेवा
नत्वेव तेन त्रेति तेषु लक्षणेषु मध्ये इत्यर्थः। तृतीयलक्षणस्य सर्व एव ज्ञायमानदोषप्रतिबंध

कतामताभिप्रायकतपारशातत्वेनोपन्यासः तदर्थश्चेतिप्रथमलक्षणार्थश्चेत्यर्थः प्रतियोगंघटितेनदो
षानादापलक्षणं संगमनीयमितिदर्शयितुं व्यभिचारादयइति नतु तेन रूपेण लक्षणघटकत्वमि
त्यवधेयं एवं च यथार्थपदादाने दुष्टत्वभ्रममादाय प्रसक्तहेतुभिन्नेति प्रसंगइति यथार्थपदस्यार्थं का
पद्यपि पर्वतत्वावच्छिन्नेवह्नित्वाद्यवच्छिन्नसाधने धूमत्वाद्यवच्छिन्नेदुष्टइत्यादि सद्धेतौ दुष्टव्यवहा
रस्यनापत्तिः तत्र तत्तत्साध्यपक्षकहेतुकानुमितिप्रतिबंधकरूपदोषप्रकारकज्ञानविषय
त्वस्यैवप्रत्येतव्यत्वात्तादृशानुमितिप्रतिबंधकबाधव्यभिचारादेश्चाप्रसिद्धत्वात् हृदादौव
ह्न्यादिसाधनमादायैव सर्वत्रैव दुष्टव्यवहारइष्टः तथापि धूमसाधनेवह्नित्वेनायंदुष्टइ १२
त्यादौवह्नित्वाद्यवच्छिन्नहेतुकधूमाद्यनुमितिप्रतिबंधकदोषप्रकारकज्ञानविषयत्वस्याप्रसि

॥तथ्यत्वात् वक्ष्यमाणसंबंधावच्छिन्नताहशानुमितिप्रतिबंधकधूमाभाववद्वृत्तित्वविशिष्टवह्न्यादिरूपप्रसि
द्धदोषप्रकारताशालिभ्रममादाय रासभादिना सर्वेषामपि तथात्वव्यवहारः स्यात् न च नञ्विशेष्यत्वन्नी
योतार्थवृत्तित्ववैशिष्ट्यभानात् रासभे तद्बाधनेन नायमतिप्रसंग इति वाच्यम् तथासति दोषपदो
यपदार्थघटकानुमितौ वह्नित्वावच्छिन्नहेतुकत्वालाभात् तद्धर्मानुसंधेन हेतुप्रकारकज्ञानजन्यानु
मितिप्रतिबंधकरूपदोषपदार्थघटकहेतौ वह्नित्ववैशिष्ट्यरूपतृतीयान्तार्थस्य तत्प्रकारतायां वा अव
च्छिन्नत्वार्थकतृतीयान्तस्थवह्नित्वावच्छिन्नत्वस्यान्वय इत्येवोपगन्तव्यात् न च विशेष्यत्वेव
ह्नित्वादिधर्मवैशिष्ट्यबोधकसमभिव्याहारस्थले दोषार्थकधातोरेव वह्नित्वावच्छिन्नहेतुकानुमि
तिप्रतिबंधकोर्थः अथवानुमित्यर्थकसाधनशब्दस्यैव वह्नित्वावच्छिन्नहेतुकानुमितिरूप विशेषल

क्षणिकत्वं यत्तद्धेतुमित्त्वं तदभावे साधनपदार्थानन्वयप्रसंगात् तथा च विशिष्यैव तृतीयार्थवैशिष्ट्या
न्वयोपगमान्नोक्तातिप्रसंग इति वाच्यम् । एवमपि वह्निना धूमसाधने रासभो दुष्ट इत्यादिव्यव
हारस्य भ्रममादाय दोषत्वाप्रसंग इति । अथवा इतरभेदानुमापकमेवेदं ल क्षणम् ० । तथा
च पर्वतपक्षकधूमसाध्यकवह्निहेतुकदुष्टलक्षणस्य तथाविधानुमितिविरोधिज्ञानविष
यव्यभिचारादिभ्रममादाय सद्धेतावितरभेदव्यभिचारित्वात् । यथार्थपदं ज्ञाने चात्र स्व
ज्ञानविषयमक तद्धेतुतावच्छेदकसंबंधाव [redacted] गाहित्याह्यं । नेनग्रस्तत्तेतुभिन्नस्या वि
संबंधीतरेण दोषप्रमाविषयत्वेपि नातिप्रसंगः ॥ अग्रेवीरशसंबंधेनैतद्धेतुसंयाच्यं १३
पक्ष अथवाज्ञायमाने निष्ठसाध्याभावत्वादिना वाधादिदोषाणां प्रतिबंधकतानसंभवति

साध्याभाववत्त्वादिनापदार्थांतरस्यैव यत्र ज्ञानं तत्र दोषाणामज्ञायमानतयाऽविरो
धित्वेनानुमित्यापत्तेः किंतु ज्ञानीयपक्षतावच्छेदकावच्छिन्नविषयतानि
रूपितसाध्याभाववत्त्वावच्छिन्नविषयतावत्त्वं न तादृशविषयतया ज्ञानविशि
ष्टत्वेन वा तद्रूपता दृशभ्रमविषयपदार्थांतरसाधारणमेवेति तेषामेव
भ्रमदशायां विरोधित्वान्नोक्तापत्तिः एवं च सद्धेतूनामपि प्रतिबंधकता
वच्छेदकनिरुक्तविषयताश्रयवन्ह्यभावादिप्रमाविशेष्यत्वादिति व्याप्ति
रिति चेन्न पद्रूपावच्छिन्नविषयतासामान्यं प्रतिबंधकतावच्छेदकं तद्रू
पविशिष्टप्रकारकप्रमाविशेष्यत्वमेव विवक्षणीयं हृदो वन्हिमान्धूमा
दित्यादौ तच्च दशारूपं हृदविशिष्टवन्ह्यभावादिकं हृदे वन्हिर्नास्तीत्यादि
ज्ञाननिरूपिततद्रूपावच्छिन्नविषयतासामान्यस्यैव हृदत्वावच्छिन्नविषयतानि

15 ।रूपित वह्न्यभाववत्ताघटावच्छिन्नविषयतात्वेन दोषनिष्ठानुमितिप्रतिबंधकतायामवच्छेदकत्वात्। सद्धेतु
स्थले च केवलवह्न्यभाववत्वादिकं न तथा तदवच्छिन्नाविषयतासामान्यांतर्गत धर्म्यविषयक
ज्ञाननिरूपितताद्दशविषयतानामनुमितिप्रतिबंधकतानवच्छेदकत्वात् एवं तद्विशिष्टवह्न्य
भाववत्वादिविशिष्टं च न किंचिद्धेतुप्रसिद्धमिति नातिप्रसंगः। तृतीयमपि लक्षणमनयैव रीत्या
परिष्कार्यमिति। यद्यपि अस्मदुक्तहेतुलक्षणत्वे ज्ञायमाने दोषप्रतिबंधकतामतानाश्रयणेऽपि
तद्रूपावच्छिन्नपक्षसाध्यहेतुकानुमितिप्रतिबंधकप्रमाविषयतद्धेतुतावच्छेदकवत्त्वं तद्रूपावच्छि
न्नपक्षसाध्यहेतुकस्थले तेनैव रूपेण दुष्टत्वमित्यर्थकतया सुखगम्ययथार्थपदसार्थक्य १४
मुपपादयितुं शक्यते। तथापि दुष्टदोषघटिततयानुरोधेन नन्वमतमवलंब्य परिष्कार
मात्रमहनइति॥

मनुद्वितीयतृतीयलक्षणयोर्दोषे अतिव्याप्तिरव्याप्तिश्च कश्चिद्धौयस्पंदेन दोषस्यैवोपादेयतया तत्त्वस्य तन्मात्रवदत्ति

त्वादत आह तत्त्वमित्यस्येति प्रथमात्रस्य दुष्टहेतुल क्षणत्वेनैवोपपत्तौ चरमयोर्दोषविलक्षणत्वमेवोचितं तत्त्व

स्तथैवा मित्यस्य यथाश्रुतार्थकत्वानुरोधादतैः आह आद्यस्यैवेति। एतादृशव्याख्याया निर्दोषत्वात्सा दुरित्युक्तं।

लिंगज्ञानस्येति मूले लिंगांशनिवेशस्य निष्प्रयोजकतया तस्याविवक्षितत्वमाह। लिंगमिति। यद्विषयकत्वेने

स्तत्र तृतीयार्थोऽवच्छेदकत्वं। तच्छेदनतिरिक्तवृत्तित्वमिदानीमेव निवेश्यते तदासंभवः विशिष्टस्यानति

रिक्तत्वया वह्न्यभावविशिष्टह्रदादिरूपदोषविषयकत्वस्य शुद्धह्रदत्वाद्यवच्छिन्नविषयकज्ञानेपि

सत्त्वे नानुमितिप्रतिबंधकतातिरिक्तवृत्तित्वादतस्त्वरूपसंबंधरूपमेव तद्वाच्यं। तथा च पर्वतो वह्निमा

नित्याद्यनुमितिप्रतिबंधकत्वमवि वह्न्यभावाद्यावृत्ति व्याप्तिरित्तद्विषयकत्वस्याप्रति बंध

कतावच्छेदकघटकत्वात्। असंभवभयेन चावच्छेदकतापर्याप्तिनिवेशासंभवात्तोयद्विषयकत्वेनेति पदस्याचष्टे

15

॥ यद्विषयकत्वेनेति यादृशविशिष्टविषयत्वेन यद्रूपावच्छिन्नविषयताकत्वेन। एवं च तत्त्वमित्यस्य तद्रूपावच्छि
न्नमित्यर्थः। व्याख्यावीजं प्रकाशयति तेनेति यत्प्रकारकत्वेन प्रतिबंधकत्वमित्युक्तौ पक्षे विशेष
णकधूममादाय पक्षे भावादौ नातिप्रसंगः पर्वतादावतिप्रसंगसंभवेपि यत्संबंधावच्छिन्नयन्नि
ष्ठप्रकारताकत्वेनानुमितिप्रतिबंधकत्वं तेन संबंधेन तद्वत्तस्य दुष्टताव्यवहारनियामकत्वो
पगमे पर्वतविशेषणकवह्न्यभाववज्ज्ञानस्य विशेषणताविशेषावच्छिन्नाधेयतासंसर्गावच्छि
न्नपर्वतादिनिष्ठप्रकारताकत्वेन प्रतिबंधकत्वात् तेन संबंधेन पर्वतादिमत्तायाः पर्वतमह
नसान्यतरत्वादिरूपसद्धेतौ सत्वेपि प्रसिद्धधूमादिरूपहेतावसत्वात्तत्र दुष्टताव्यवहारापत्ते १५
रयोग इति तदनुरोधेन पक्षविशेष्यकेत्युक्तम् भ्रमपदं निश्चयसामान्यपरम् तेन सद्धेतौ
हीत्यादिपदग्राह्यसाध्यसाध्यशून्य पक्षकदुष्टहेतौ प्रतिबंधकप्रमाविषयसाध्याभावादेरेव

सत्वे विना संगतिः नातिप्रसंगइति उक्तव्याख्याने अनतिरिक्तवृत्तित्वरूपमे
वावच्छेदकत्वविवक्षणीयं विशेषणीभूतवह्न्यभावाद्यविषयकेश्च ह्रद इत्वा
दिनावह्न्यभावविशिष्टह्रदादिविषयकेज्ञाने वह्न्यभावविशिष्टह्रदत्वाद्य
वच्छिन्न विलक्षण विषयता निरूपकत्वस्या सत्वेनोक्तासंभवानवका
शात् तथा च केवलवह्न्यभावत्वाद्यवच्छिन्नविषयतीकत्वस्यप्रतिबंध
कत्वातिरिक्तवृत्तित्वान्नातिप्रसंगइत्यर्थः ननु स्वरूपसंबंधरूपावच्छेद
कत्वनिवेशे अपमेवोभिप्रसंगो दुर्वारः अप्रामाण्यज्ञानाभाववोद्विशि
ष्टरूपावच्छिन्नविषयकनिश्चयत्वं प्रतिबंधकतावच्छेदकतापर्याप्त्य
धिकरणमित्यतादृशाविवक्षणपातादृशातिप्रसंगवारणेपुनरसंभवः
वह्न्यभावत्वादिनाघटाद्यवगाहिनोवह्न्यभाववान्ह्रद इत्यादिज्ञानस्यां

पित्रतिबंधकतयातत्साधारण्यानुसंधेनवहित्वाघवछिन्नप्रकारता
निरूपितअभावत्वेछिन्नप्रकारतानिरूपितहृदत्वाघवछिन्नवि
शेष्यताकनिश्चयत्वेनेवप्रतिबंधकतायावक्तव्यतयावह्न्यभाव
त्वछिन्नविषयतायाःतादृशप्रकारतानिरूपितहृदत्वाघवछिन्नवि
षयतात्वेनावछेदकत्वेपिअप्रामाण्यज्ञानाभावादिविशिष्टवह्न्य
भावविशिष्टहृदत्वावछिन्नविषयताकनिश्चयत्वस्यावछेदकताप १६
र्यानधिकरणत्वादित्यततृतीयायाअनतिरिक्तवृत्तित्वरूपावछेद
कतार्थकत्वंस्फुटयतिअवछेदकत्वंचेतिहृल्लक्षणेघटकत्वंसम्य
र्थःनचविशिष्टदोषविषयकत्वस्यसंशयादौसत्वात्पुनरसंभवइ
तिवाच्यंज्ञानस्यसत्वज्ञानपदमनाहार्यप्रामाण्यज्ञानानास्कंदित

निश्चयपरंपरपर्यवसितधर्म्याधेयत्वं तस्य यद्विषयकत्वेन चापः॥ एवं च तादृशनिश्चयवृत्तित्वविशिष्टं यादृशविशिष्टविषयकत्व
मनुमितिप्रतिबंधकतानतिरिक्तवृत्तितादृशत्वस्य विवक्षणीयतया असंभवानवकाशात् अनतिरिक्तवृत्ति
त्वं च स्वव्यापकत्वकत्वं न तु तच्छून्यावृत्तित्वं विशिष्टविषयत्वस्य विशेष्यीभूतविशिष्टविषयकतानतिरिक्त
तया तस्यातिरिक्तप्रसक्तत्वेविशिषेतस्मिन्नतिप्रसक्तत्वस्य दुर्घटितत्वात् प्रतुप्रतिबंधकताशू
न्यतादृशनिश्चयावृत्तित्वमेवानतिरिक्तवृत्तित्वमतो नोक्तरीत्या संभव इति तदसत् तथा सति मूलो
पात्तस्य ज्ञानस्य स्ववैयर्थ्यप्रसंगात् ह्रदत्वावच्छिन्नविशेष्यकवह्न्यभावविशिष्टह्रदत्वाद्यवच्छि
न्नविषयकयत्किंचिज्ज्ञानीयविषयतानिरूपकत्वस्य प्रतिबंधकताशून्यतादृशनिश्चयावृत्ति
त्वेन शुद्धह्रदत्वावच्छिन्ने अतिप्रसंगा॰ ञ्चे अस्मन्मते अनुमितिप्रतिबंधकतायास्तादृशनि

१७ ।।श्चयरत्तित्वविशिष्टह्रदत्वाद्यवच्छिन्नविषयताकत्वत्ताद्यवच्छिन्नव्यापकताविरहादतिप्रसंगानवकाशा
17 त्।अथैवमपिजातित्वादिनाह्रदत्वादिविषयकस्यजातिमान्वह्न्यभाववानित्यादिज्ञानस्यापिव
ह्न्यभावविशिष्टह्रदत्वाद्यवच्छिन्नविषयकतयातस्यचह्रदोवह्निमानित्यनुमित्यविरोधितयासंभ
वेः तत्त्वमान्वह्निमानित्यादिस्थलीयदोषासंग्रहेणाविशेषितधर्मोवच्छिन्नपक्षादिस्थलीय
स्यापिकिंचिद्विशिष्टनघटितदोषस्यासंग्रहेणचपक्षतावच्छेदकाद्यंशेन्यप्रकारकत्वादिनिवे
शस्यावश्यकत्वात् तादृशविशिष्टघटकपदार्थविषयकत्वस्यज्ञानविशेषणत्वेसर्वमा को
घ२ शवदित्यादिस्थलीयबाधादौतद्घटकाप्रसिद्ध्या।अव्याप्तिः।यद्रूपावच्छिन्नस्ययादृशविशिष्ट
घटकतातत्तद्रूपावच्छिन्नविषयताभिन्नकिंचिदवच्छिन्नाविषयताशून्यत्वंज्ञानेनिवेश्यं १७
जातित्वाद्यवच्छिन्नस्यचह्रदत्वादेनवह्न्यभाववद्ह्रदत्वाद्यवच्छिन्नघटकतेतिजातित्वाद्यवच्छिन्न

स्यात्किन्तु तथा सति ह्रदो जात्यभाववानित्यादिस्थलीयबाधादेरसंग्रहत्वात् जातित्वादिना ह्रदत्वादिरूपधर्मितावच्छेदकावगाहिनो जातिमान् जाति
तिमानित्यादिज्ञानस्य जातित्वाद्यवच्छिन्नह्रदत्वादिनिष्ठधर्मितावच्छेदकरूपविषयताया निरूपकविषयताभिन्नत्वविरहेण तादृशज्ञानस्यानुमितिसप्रति
बंधकत्वस्य भ्रमत्वात्तेनावारणात् ५४

॥ह्रदत्वादिविषयितातो तादृशविषयिताभिन्नैव तच्छून्यत्वं च नोक्तज्ञानस्येति न दोषइमैवं । यद्रूपावच्छिन्न
विषयितात्वं तादृशविशिष्टविषयकत्वसमानाधिकरणाभावप्रतियोगितावच्छेदकं तद्रूपावच्छिन्नविषयिताशू
न्यत्वं ज्ञाने विशेषणं देयं तेन अप्रतिबंधकज्ञानविषयतावच्छेदकजातित्वादिविशेषितह्रदत्वादिघटिततद्रूपा
वच्छिन्नविषयितात्वावच्छिन्नाभावस्य दोषात्मकविशिष्टविषयतासमानाधिकरणत्वात्तत्ज्ञानव्यावृत्तिरि
ष्यर्थः । विशिष्टस्याविषयकत्वस्य असत्त्वेपि वह्न्यभाववद्ध्रदिना घटाद्यवगाहिभ्रमे असत्त्वेपि । तथा च
विशिष्टविषयकत्वेन न प्रतिबंधकता संभवतीति भावः । भ्रमात्प्रतिबंधेपि तादृशभ्रमस्यानुमित्यनुत्पाद
प्रयोजकत्वेपि न क्षतिः नोक्तयुक्त्या पर्याप्तिनिवेशोसंभवः तदनिवेशे पूर्वातिप्रसंगो वा ननु विशिष्टदो
षघटकीभूततदेकदेशविषयितायां स्वरूपसंबंधरूपावच्छेदकत्वसत्त्वेपि विशिष्टविषयितासामान्य
स्य तादृशावच्छेदकत्वविवक्षयातिप्रसंगवारणसंभवात्तदेव कथं न विवक्षितमिति । नच सामान्य

॥पदस्य व्यापकत्वार्थकतयाप्रतिवंधकतावच्छेदकतायां विशिष्टविषयतात्वव्यापकत्वं प्रवेश्यं तदपेक्षयाप्रति
वंधकतायां विशिष्टविषयिताव्यापकत्वनिवेशनमेवोचितमिति वाच्यम्। यतो वह्न्यभाववविशिष्टह्रदादिनि
रूपितविषयितात्वस्तु मिथ्याप्रतिवंधकसंशयाहार्याप्रामाण्यज्ञानानास्कंदितज्ञानसाधारणतया नानुमि
तिप्रतिवंधकतायास्तद्व्यापकत्वमिस्माहार्याप्रामाण्यज्ञानानास्कंदितत्वनिश्चयात्वनिलविशिष्टतायाविशिष्ट
विषयतायाव्यापकत्वं प्रतिवंधकतायां भवता विवक्षणीयं तदपेक्षया लाघवेन स्वरूपसंवंधरूपावच्छेद
कतायां वाधादिरूपविशिष्टविषयितात्वव्यापकत्वमेव विवक्षितुमुचितं तथा सति निश्चयत्वाद्यनिवेशा
त् समानाकारकज्ञानेषु विषयितायाभेदस्याप्रामाणिकतया संशयादिज्ञानीयविषयितायाअपि नि
श्चयत्वादि विशिष्टीयतयाप्रतिवंधकतावच्छेदकतया वाधादिरूपदोषनिरूपितविषयितात्वव्यापक १८
तायाअक्षतत्वात् नच वह्न्यभाववान्ह्रदो वह्निमानित्याहार्यज्ञानीयवह्न्यभाववविशिष्टह्रदादिवि
षयितानअनाहार्यज्ञानसाधारिणी तादृशाहार्यज्ञानसमानाकारानाहार्यज्ञानाप्रसिद्धेः॥ ॥

॥ह्रदो वह्न्यभाववानित्याहार्यज्ञानीयवह्न्यभावविशिष्टह्रदादिविषयितातो वह्न्यादिप्रकारतानिरूपिततादृशाहार्यज्ञा
नीयविशिष्टह्रदादिविषयितायाभिन्नत्वात् । तथाच अनाहार्यत्वविशिष्टविषयितायाएव प्रतिबंधकताव
छेदकतयानदर्शिनाहार्यज्ञानीयविषयितासाधारणविशिष्टविषयिताव्यापकत्वमिति वाच्यम् ॥ एवंस
त्यनाहार्यज्ञानीयविशिष्टविषयितात्वव्यापकतायाएवविवक्षितत्वात् । तथापिसंशयान्यत्वाप्रा
माण्यज्ञानानास्कंदितत्वयोरप्रवेशेन लाघवान्यायात् । मैवं स्वस्वरूपसंबंधावच्छेदकप्रवेशे पाषाणमयत्वा
द्यवच्छेदेन वह्न्यभाववत्तानिश्चयविशिष्टस्य पाषाणमयत्वादिविशिष्टपक्षादर्शनस्य वह्न्याद्यनुमितिप्र
तिबंधकतया तदवच्छेदकविषयितारूपपाषाणमयत्वादिविशिष्टपक्षादावतिव्याप्तिः । अनतिरिक्त
वृत्तित्वरूपावच्छेदकत्वानिवेशे मते नाहृत्या विशिष्टविषयितायाः पाषाणमयत्वावच्छेदेन वह्न्यभाववत्तानि

१९ श्याविशिष्टज्ञानसाधारणतया अनुमितिप्रतिबंधकतातिरिक्तवृत्तित्वेनातिप्रसंगानवकाशात्। न चानतिरिक्तवृत्तित्व
रूपावच्छेदकत्वनिवेशेपि जलाद्यवच्छेदेन वह्न्यभाववत्ताघटितस्य वह्न्याद्यभाववज्जलादिमद्ध्रद इति जलादिविशिष्ट
ह्रदादिरूपपक्षस्य जलवान् वह्न्यभाववानित्यादिज्ञानसहितस्य जलवान् ह्रद इत्यादिज्ञानस्य तादृशज्ञा
नाविशिष्टतादृशज्ञानत्वेनैव प्र तिबंधकतया तादृशप्रतिबंधकतानन्यज्ञानाविषयस्य सत्प्रतिपक्षा
ख्यानात्मकस्य वारणाय ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबंधकतायामवश्यं निवेशनीयतया मन्मते
तत्रातिप्रसंग इति वाच्यं। ज्ञानवैशिष्ट्यानवच्छिन्नत्वस्य प्रतिबंधकताविशेषणत्वे प्रतिहेतुव्यापक
साध्याभावसमानाधिकरणतद्धेतुमत्पक्षरूपसत्प्रतिपक्षाव्याप्तेः। साध्याभावांशे तद्व्यापकताग्र
हविशिष्टतद्वत्ताज्ञानत्वेन स्वतंत्रसाध्याभावधर्मिकतद्व्यापकतावैशिष्ट्यतद्वत्ताज्ञानसाधारण्या
नुरोधेनावश्यं प्रतिबंधकतयैवोपपत्तेः। तादृशविशिष्टज्ञानस्य ज्ञानवैशिष्ट्यानवच्छिन्न १९

प्रतिबंधकतांतरेमानाभावादुक्तविशिष्टेऽतिप्रसंगास्तु विवक्षिणीयविशिष्टांतराघटितत्वविलक्षणैनैव वारणीयः
२ विषय नचज्ञानद्वयसाधारणप्रतिबंधकतायाः प्रत्येकज्ञानैर्विशिष्टविषयकत्वेनानतिरिक्तत्वे च नित्यरूपावच्छेदकता
वत्॰ तथाच दर्शितविशिष्टघटकस्य प्रत्येकज्ञानविषयस्य निरुक्तविशिष्टात्मकतेति निरुक्तविशिष्टांतरा
घटितत्वमुक्तविशिष्टस्यावश्यकमेवेति वाच्यं। वक्ष्यमाणविशिष्टांतराघटितत्वस्य यादृशविशिष्टविष
यकनिश्चयविशिष्टयादृशविशिष्टविषयकनिश्चयत्वं प्रतिबंधकतानतिरिक्तवृत्तितादृशविशिष्टद्वया
घटितत्वस्यापि विवक्षिणीयतया उक्तविशिष्टवारणसंभवात्। न चैवमुक्तसत्प्रतिपक्षाव्याप्तिः
तस्य प्रतिहेतुव्यापकताविशिष्टसाध्याभावप्रतिहेतुविशिष्टपक्षात्मकनिरुक्तविशिष्टद्वयाघटि
तत्वादिति वाच्यम्॰ सत्प्रतिपक्षघटकतादृशविशिष्टद्वयविषयताभिन्ननिरुक्तविशिष्टद्वय

विषताशून्यत्वतीतिविषयत्वस्यविशिष्टद्व्याघटितेतात्पर्यात्। यत्रसत्प्रतिपक्षासिद्धित्वभिन्नानांतमनुपादे
यमेव साध्यादिभेदेन लक्षणभेदात् भ्रमात्मकज्ञानीय विषयितासाधारणरूपेणैवावगाहिहेतुव्यापकता
विशिष्ट साध्याभावादिविषयितोपादेयानवच्छिन्नविशिष्टस्य सत्प्रतिपक्षता न स्वीक्रियते। अपि तु हे
तुतावच्छेदकाघटित साध्याभाववद्वृत्तिमत्त्वक्षात्मक विशिष्टस्यैव व्यापकसामानाधिकरण्यरूप
व्याप्तिविशिष्टस्योक्तरीत्यासंग्रहे तद्धर्मव्यापकसाध्याभावकालीनतद्धर्मविशिष्टपक्षादिव्या
वृत्तिरप्यशक्यास्यादित्यविशेषेण व्यापकताघटकविशिष्टमात्रस्य लक्ष्यतायाएवयुक्तत्वा २०
त्व। तथाचोक्तप्रयासमपेक्ष्य ज्ञानवैशिष्ट्यानवच्छिन्नप्रतिबंधकता। निवेशनमेवोचितमितिवाच्यं
एवमपि प्रकृते हेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वघटितस्य भेदेनासाधार
ण्याधिरोधस्य च रूपस्य विषयितायाः पक्षधर्मिकप्रकृतहेतुमत्ताज्ञानवैशिष्ट्यानवच्छिन्न

प्रतिबंधकतायामेवावच्छेदकत्वात् प्रतिबंधकतायां ज्ञानवैशिष्ट्यमनवच्छिन्नत्वस्य निवेशासंभवात्। दृशि
तातिप्रसंगवारणाय निरुक्तविशिष्टद्वयाघटितत्वस्यैव निवेशनीयत्वात् नच पक्षवृत्तित्वविशेषि
तं प्रकृतहेतुनिष्ठसाध्यव्यापकीभूताभावप्रतियोगित्वमेवासाधारण्यादिस्थले वाच्यम्। पक्षवृ
त्तित्वाघटितविशिष्टविषयतया अप्रतिबंधकज्ञानसाधारणतया प्रतिबंधकतानवच्छेदकत्वात्
तादृशस्य चासाधारण्यादेः पक्षवृत्तित्वविशिष्टप्रकृतहेतुसाध्यव्यापकाभावप्रतियोगित्वविशि
ष्ट प्रकृतहेतुरूपनिरुक्तविशिष्टद्वयघटिततया निरुक्तविशिष्टद्वयाघटितत्वनिवेशेपि न संभ
वतीति वाच्यम्। पक्षवृत्तित्वाघटितविशिष्टस्यैवासाधारण्यरूपताविरोधोपि फलतः प्रतिरोध ए
व तदन्यत्वेन वा विरोधिविशेषणीयमिति पंक्तिव्याख्यानावसरे संपादनीयत्वात् न च तिरिक्तवृत्ति
त्वरूपावच्छेदकत्वनिवेशे व्यभिचारादिघटितपदार्थांतरेऽतिव्याप्तिः॥ तद्विषयकत्वस्यापि

२१

21

॥प्रतिबंधकतानतिरिक्तत्वात्तत्वादत आह विशेषणीयं चेति ताहशलक्षणमिति शेषः। ताहशविशिष्टेति अनुमि
तिप्रतिबंधकतायां॰ यद्रूपावच्छिन्नविषयकत्वमवच्छेदकं तद्रूपावच्छिन्नेत्यर्थः। व्यभिचारत्वाद्यवच्छिन्न
स्य। व्यभिचारत्वादिरूपे ताहशरूपावच्छिन्नघटितत्वादसंभवइत्यतो नेति स्वावच्छिन्नाविषयक
प्रतीतिविषयतावच्छेदकावच्छिन्नार्थकम् अतः शुद्धव्यभिचारादेर्मेयत्वविशिष्टव्यभिचारत्वाद्यव
च्छिन्नत्वेपि न क्षतिः तदघटितत्वं तदविषयकप्रतीतिविषयत्वं। एवं चानुमितिप्रतिबंधकता
यां याहशरूपावच्छिन्नविषयकत्वमवच्छेदकं ताहशं यत्स्वावच्छिन्नाविषयकप्रतीतिविष २१
यतावच्छेदकं तद्रूपावच्छिन्नोविषयकप्रतीतिविषयतावच्छेदकं यत्तदवच्छिन्नत्वमितिसमुदितार्थः
यद्रूपावच्छिन्नेलक्षणं संगमनीयं तदेवस्वपदार्थः। भवति हि व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रती
ये तिविषयतावच्छेदकामेयत्वाबाधत्वादयः तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकं व्यभि

चारत्वादीति तदवच्छिन्नेतलक्षणयासंगतिः मेयत्वविशिष्टव्यभिचारत्वादेः स्वावच्छिन्नाविषयकप्रतीति
विषयतावच्छेदकव्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयत्वावच्छेदकत्वाभावस्यैवान्ने
तदवच्छिन्नेऽतिव्याप्तिः। मेयत्वविशिष्टव्यभिचारादेरपि मेयत्वादिना व्यभिचारत्वाद्यवच्छि
न्नाविषयकप्रतीतिविषयत्वात्तद्दोषः स्यादेतत्तादृशरूपाश्रयधर्मिणां तदवच्छिन्नाविष
यकप्रतीविषयत्वेनाविशिष्टस्यैव तादृशविषयतावच्छेदकत्वेन विशेषितामेयत्वे
विशिष्टव्यभिचारत्वाद्यपाविषयकत्वस्य व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतौ
दुर्घटत्वात्तद्दोषः अत्र स्वाश्रययाविषयकत्वमुपेक्ष्य स्वावच्छिन्नाविषयकत्वं निवे
शेः। स्वावच्छिन्नाविषयकप्रतीतिविषयवृत्तित्वस्य तादृशधर्मविशेषणत्वे व्यभि
चारत्वादेरपि मेयत्वादिना व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयेव्यभि

हे॰ सामा॰ नि॰ २२

22

वच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्व द्र २

चारादौ वर्त्तमानत्वादसंभव इत्यतस्तादृशविषयतावच्छेदकत्वेन धर्मो विशेषितः॥ प्रमेयं गगनवद्वाच्य
त्वादित्यादौ व्यभिचारत्वाद्यौगनाभाववन्मेयत्वादितदाश्रयाविषयकप्रतीत्यप्रसिद्ध्या व्याप्तिरतस्त
द्वच्छिन्नाविषयकत्वनिवेशः॥ अत्र च तादृशविशिष्टान्तराविषयप्रतीतिविषयतावच्छेदकत्व
स्य दोषतावच्छेदकधर्मविशेषणतापेक्षया ज्ञानस्येत्यत्र ज्ञानपदार्थे तादृशविशिष्टान्तरावि
षयकत्वनिवेश एवोचितः॥ एवं च निरुक्तवक्ष्यमाणकल्पे यद्विषयकनिश्चयस्येत्यत्र ज्ञानस्य
त्वे निश्चय एव तन्निवेशः लाघवादित्यवधेयं॥ अथ धूमव्यभिचारि वह्निमान् धूमवान् वह्नेरि
त्यादौ बाधादेर्व्यभिचारादिघटिततया तत्राव्याप्तिः॥ न च यद्रूपावच्छिन्नविषयकत्वं स्वावच्छि
न्नविषयकत्वावच्छिन्नप्रतिबंधकतासामान्यावच्छेदकं तादृशरूपांतरावच्छिन्नाघटितत्व
स्य विवक्षितत्वान्न दोषः व्यभिचारस्योक्तबाधविषयकत्वान्यूनवृत्ति व्याप्तिज्ञानप्रतिबंधकता २२
वच्छेदकविषयताकत्वेपि निरुक्तविशिष्टांतराघटितत्वाक्षतेरिति वाच्यं॥ व्यभिचारत्वादिरूपस्वा

विरहेण तद्घटितत्वस्याकिंचित्करत्वादिति॥

पत्रे २२

वच्छिन्नाविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकस्य तदवच्छिन्नविषयकप्रतीतिविषयतावच्छेदकस्याप्रसिद्ध्याऽसंभवात् व्यभिचारस्य मेयत्वविशिष्टव्यभिचारत्वादेरेव तथाविध
विषयितानिरूपकतावच्छेदकत्वात् तस्य च व्यभिचारत्वाद्यवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वाभावात् न च स्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकविषयितानिरूपकतावच्छेदकः किञ्चि
त्त्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदको यस्य धर्मस्य तद्यत्त्वं प्रमेयत्वविशिष्टव्यभिचारत्वादिनदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्याविवक्षणीयत्वान्न दोष इति वाच्यं तथासति ह्रदत्वव्यभिचा
रिवह्निमान् धूमवत्त्वाद्ध्रद इत्यादौ बाधत्वाद्यवच्छिन्नघटकतावच्छेदकस्य ह्रदव्यभिचारिवह्निमत्त्वादेः स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकीभूतस्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेद
कविषयितानिरूपकतावच्छेदकव्यभिचारत्वकत्वाद्व्याप्यैकदेशत्वात् न च स्वावच्छिन्नविषयितावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतयत्किञ्चिद्विषयितात्वसाध्यसाध्यधर्मावच्छिन्ननिरूपिततादृशतादृशप्राप्यमावच्छि
न्नाविषयकप्रतीतिविषयतावच्छेदकयत्त्वं तद्रूपावच्छिन्नत्वमेव सम्पादितं लक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वावच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतायाः शुद्धव्यभिचारत्वाद्यवच्छिन्नानि
न्नाविषयकप्रतीतिविषयतावच्छेदकयत्त्वं तद्रूपावच्छिन्नत्वमेव ... व्यभिचारत्वाद्यवच्छिन्नानिरूपितत्वेन स्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य स्वभिन्नसत्त्वेन मेयत्वविशिष्टव्यभिचारत्वादेः स्वपदेनोपादानसम्भवात्तत्त्वव्यभिचा
रूपिताविषयिताया मेयत्वविशिष्टव्यभिचारत्वाद्यवच्छिन्नप्रतिबन्धकतासामान्यावच्छेदिकायाः कस्याश्चिद्विषयताया व्यभिचारत्वादिविशिष्टानिरूपितत्वासंभवात् तादृशविषयिताया पादृश्य मेयविशिष्टानिरूपितत्वे हेतुत्वमेव तद्वि
स्त्वादिविशिष्टविषयकत्वाद्यवच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूतविषयताया अवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्य व्यभिचारत्वादेः स्वपदेनोपादाने तु पाक्षिकत्वासिद्धानुकल्पितो दोषः अयथावायद्धर्मावच्छिन्नविषयितावच्छिन्नप्रतिबन्धकतासामान्यावच्छेदकीभूत
शिष्टव्यभिचारत्वादेरेव तादृशत्वात्तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकस्य व्यभिचारत्वादेः स्वपदेनोपादाने ... बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्नेऽतिप्रसङ्गात् तादृशधर्मावच्छिन्नविषयकत्वावच्छिन्नबाधज्ञानप्रतिबन्धकतायां केवलव्यभिचा
विषयितात्वं यद्धर्मावच्छिन्ननिरूपितत्वव्याप्यं तद्धर्मवत्त्वमेव सम्पादितमित्यर्थ इति वाच्यं बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्नविषयिताया एवं तथाविधप्रतिबन्धकतासामान्यावच्छेदकत्वेन तस्यास्तादृशविशि
ष्टविषयितापादृशव्यभिचारत्वानवच्छिन्नप्रतिबन्धकतायां च केवलबाधविषयिताया अनवच्छेदकत्वेन बाधविशिष्टव्यभिचारत्वाद्यवच्छिन्नविषयितायाः एवं तथाविधप्रतिबन्धकतासामान्यावच्छेदकत्वेन तस्यास्तादृशविशि
ष्टविषयितापादृशव्यभिचारत्वादिनिरूपितत्वव्याप्यत्वाभावात् सत्प्रतिपक्षकल्पे स्वपदेन चरमकल्पे यत्पदेन तस्योपादानसंभवात् अयथा वह्न्यभावादिधर्मितावच्छेदककवह्न्यादिप्रकारकशुद्धे दिविशेषभव्यभिचारविशिष्टवह्न्यादिधर्मितावच्छेदकसाध्यव्याप्य
वृत्तिसद्धेतुत्वमावश्यकत्वात् प्रथमकल्पे स्वपदेन चरमकल्पे यत्पदेन तस्योपादानसंभवात् ... ह्रदस्यानुमितेरेवाप्रसिद्धत्वात् तादृशानुमितिप्रतिबन्धकत्वाघटितत्वात् तल्लक्षणस्य तद्रूपावच्छिन्नपक्षकवह्न्यादिहेतुकु
नुयाद्वह्न्यादिप्रकारकपक्षस्यानुमितेर्यस्याः संभवेन तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसाध्यसंसर्गकानुमितेरेवाप्रसिद्धत्वात्तादृशानुमितिप्रतिबन्धकत्वाघटितत्वात् तल्लक्षणस्य तद्रूपावच्छिन्नपक्षकवह्न्यादिहेतुकु
नुयाद्वह्न्यादिप्रकारकपक्षस्यानुमितेर्यस्याः संभवेन तादृशपक्षतावच्छेदकावच्छिन्नपक्षकसाध्यसंसर्गानुमितिप्रतिबन्धकत्वेन ... मेवसत्ताव देवं तथापि विशेषणगुणवह्निमो घटो गुणमानत्वाद्वह्निन्नस्याद्दोषस्य तत्समाधानेऽनुमिति प्रसिद्धौ विशेषणगुणवद्धटादि पक्षवृत्तिसिद्धे (१)
दोषाः व्याप्तिः स्वयमेवैवं त्वतिरेकिनि तद्धेतोरागमे योगोऽसिद्धेः ... मेवसत्ता देवं तथापि विशेषणगुणवह्निमो घटो गुणमानत्वाद्वह्निन्न
ग्रा॰ वह्न्यादिपक्षवाप्यवद्याः संयुक्तः ... अवच्छिन्नघटत्वावच्छेदेन गुणवत्त्वमेव बाधः आश्रयासिद्धिस्तद्घटत्वसामानाधिकरण्येन घटत्वावच्छेदेन वा विशेषणगुणवत्त्वे तत्संयोगस्य तत्र सामान्यधर्मावच्छिन्नहेतु
त्वव्यापकताघटितो व्याप्यत्वासिद्धिः विशेषणगुणत्वेन घटत्वव्यापकताया तत्र प्रवेशो विशेषमानरूपेण व्यापकताया तदनन्तर्भावादिति तन्नादृशसिद्धया संयुक्तस्य तेन तदापि विशेषणगुणाभाववान् द्वितीयलक्षणावच्छिन्नो
तो गुणसामान्याभाववान्निरुक्ताद्धेतोः नापि तल्लक्षणे वह्निन्नेऽघटविशेषणगुणवत्त्वस्य आश्रयसिद्धोऽन्तः तदवच्छिन्नेऽघटे गुणवत्त्वस्य बाधप्रवेशस्यावश्यकत्वात् यथाश्रुत तत्तल्लक्षणस्य हस्यावश्यकनयोः विशेषणानामनुपपत्तिः तत्त्वान्
स्वत्वं नीलादि निरुक्तकल्पसत्त्वविशिष्टव्यभिचारादिवारणाय विशिष्टानामनुपपत्तेः तत्त्वस्य निवेशनीयत्वान्नैवं दर्शितानामपाद्यसंग्रहो दोषश्च ... नु स्वावच्छिन्नानिरूपितविषयकत्वावच्छिन्नयत्किञ्चिद्विशिष्टप्रतिबन्धकताव
दकविषयितानिरूपकविशिष्टानिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूपितकधर्मवत्त्वं सम्पादितार्थः मेयत्वविशिष्टव्यभिचारत्वादिकं नेतादृशं तद्वच्छिन्नविषयकत्वावच्छिन्नप्रतिबन्धकतावच्छेदकविषयिताकस्वस्य
दकविषयिताक विशिष्टनिरूपितविषयितात्वव्यापकस्वावच्छिन्ननिरूपकताकधर्मवत्त्वं ... आश्रयासिद्ध्यादिविषयकत्वावच्छिन्नविशिष्टपत्वं यस्यादिनिरूपितप्रतिबन्धकतावच्छेदकविषयिताकविशिष्टानिरूपित
भिचारादिविषयितात्वस्य तद्वच्छिन्ननिरूपितत्वव्याप्यत्वात् उक्तस्थले विशेषणविशिष्टहेत्वादिरूपाश्रयासिद्ध्यादि विषयकत्वावच्छिन्नविशिष्टपत्वं यस्यादिनिरूपितप्रतिबन्धकतावच्छेदकविषयिताकविशिष्टानिरूपित
विषयितात्वस्य तादृशाश्रयासिद्ध्यादिनिरूपितत्वव्याप्यत्वात् तत्र लक्षणासमन्वयः प्रतिबन्धकतायां यावन्निवेशान्नाऽतिप्रसङ्गः स्वावच्छिन्नानिरूपितविशिष्टविषयितात्वव्यापकप्रति
हा॰ विषयितात्वस्य तादृशाश्रयासिद्धादिनिरूपितत्वव्याप्यत्वात् ... मेयत्वविशिष्टव्यभिचारत्वादिकं नेतादृशं स्वावच्छिन्नानिरूपितव्यभिचारत्वावच्छिन्नविषयितावच्छिन्नायामेव प्रतिबन्धकतायाम्
बन्धकतावच्छेदकत्वात् वह्निन्नविषयिताको यो धर्मस्तद्वत्त्वं वा सम्पादितं लक्षणार्थः मेयत्वविशिष्टव्यभिचारत्वादिकं नेतादृशं स्वावच्छिन्नानिरूपितव्यभिचारत्वावच्छिन्नविषयितावच्छिन्नायामेव प्रतिबन्धकताया
वह्निन्नविषयिताया अवच्छेदकत्वात् उक्तस्थलेऽपि आश्रयासिद्ध्यादिविषयकत्वस्य तदनिरूपितबाधविषयितानवच्छिन्नाया विशिष्टप्रतिबन्धकतानवच्छेदकत्वात् लक्षणसमन्वय इति प्राञ्चः यद्विषयकस्य निश्चयस्य विरोधि प्र॰
विषयितात्वनिश्चयस्य निश्चयकल्पेऽनुमितिप्रतिबन्धकताया ग्राह्यकत्वानुमितिप्रतिबन्धकताया विशिष्टान्तरविषयकत्वानवच्छिन्नविशेषणतानामसंभवेन यस्य सद्धेतुत्वाद्दृशापादार्थानामादिनत्वेन विशेषणीयतया क्वा
धीयाऽऽश्रयासिद्धिपरिहारत्वात् अत्र केचित् स्वसजातीयविशिष्टान्तराघटितत्वमेव यत्पदार्थविशेषणं तथा सामानाधिकरण्ये तत्सामानाधिकरण्यविशिष्टाविशिष्टभेदेन बाधत्वव्यभिचारत्वादिनोक्तरूपेण व्यभिचारादेर्वारणाय हि सजातीय
तिव्यभिचारादिनिवारणाय दोषो नाव्याप्तिः न चैवं यद्विषयकनिश्चयस्य विरोधिविषया ... तत्स्वसजातीयपदवैयर्थ्यात् बाधादेस्तादृशरूपेण सजातीयत्वप्रसिद्धेर्व्याप्तिप्रसङ्गवारणाय हि

नव्यपरी

हे॰ सामा॰ लि

१२

23

िवाप्यम् अस्मज्ञानीयविशिष्टज्ञानं नरहितं यत्त्वं तद्विषयकप्रतीतिविषयत्वस्य विवक्षितत्वात् अन्यथा नित्यत्वानंतर्भावेन पदार्थान्तरेषु नियमसंगवारकतया तद्दलसार्थक्यात् न च व्यभिचारविशिष्टमेयत्वादेर्हेत्वाभासत्वविरहाद्धेत्वा
भासविभाजकरूपेण तज्ज्ञानीयाप्रमितिज्ञानस्य लक्ष्यपदेनोपादानम् अव्याप्यतया मेयत्वविशिष्टव्यभिचारादेर्लक्ष्यपदेनोपादेयतया तत्सार्थक्यं व्यभिचारत्वादिप्रमितेरपि व्यभिचारत्वादिहेत्वाभासविभाजकरूपेण तज्ज्ञानीयप्रमितिरिति तद्वि
षयकप्रतीतिविषयत्वस्य व्यभिचारविशिष्टमेयत्वादौ सत्त्वात् तत्रातिप्रसंग इति वाच्यम् विशिष्टानतिरेकवादे तत्रेतरविषयतासाध्यसाधनयोरिव विशिष्टज्ञानविषयविषयिभावसंबन्धेन व्याप्तिग्रहप्रतिबन्धकत्वाभावादितिरिक्तहेत्वादित्वाभावात्
व्यभिचारविशिष्टमेयत्वादिसाधारण्यादिति ध्येयम् अत्रेदं बोध्यं प्रतियोगितिविशिष्टत्वाभावे वाच्यानामहेतुलक्षणाकरणेऽपि व्यभिचारत्वादिहेतुबाधादावव्याप्तिवारणाय प्रमेयत्वं तत्र हेत्वाभासजातीयविशिष्टज्ञानं तुरुर्यादिनियतत्वं धूमव्यभिचारित्व
निश्चयेनाप्रतिबन्धकत्वात् तद्धितबाधादावसत्त्वात् यद्विषयतद्वितिकत्वं तद्रूपवत्त्वं विषयतापर्याप्त्यधिकरणत्वं तत्संसर्गमेव पुरस्कृत्य यदेव विषयताया पर्याप्तिं विशेषतया बाधव्याप्तिर्वह्निवैशिष्ट्यनिरूपकत्वाभिचारत्वेन ज्ञाती
य विशिष्टान्तरवृत्तित्वं तद्रूपपर्याप्तविषयताशालित्वं मीमांसकानाम् नच तद्ब्रूमिवावस्तुत्वाभासविशिष्टकत्वेनासाधारणत्वविवक्षणीये नव्याप्तिर्नाव्याप्तिर्द्वयोकव्यभिचारादेर्बाधत्वाभ्रमेनाहेत्वाभासादिसजातीयतत्वमनवस्थितेः
सत्प्रतिपक्षस्य पक्षे सत्ताधिविशिष्टव्यभिचारे सोऽहेतुत्वावध्यव्यभिचारत्वादिप्रामाण्याविरोधासजातीयविशिष्टवत्त्वस्य व्यभिचारविशिष्टवापादेः प्रसिद्धावविनष्टाद्दिनत्वसत्त्वेनानियमे तस्या व्यभिचारादिहितवाधादेः स्वरूप
प्रकारेणैव दर्शनीयपदवाच्यत्वीयः नेयत्वविशिष्टव्यभिचारादौ नाहेत्वाव्यभिचारत्वावच्छिन्ने नातिप्रसंगः नदोषत्वाव्यवहारप्रसंगः अत्रमेयत्वविशिष्टव्यभिचारादौ दोषत्वादिव्यवहाराभावात्रैसापत्तिः संगवत्ति ववविशि
ष्टव्यभिचारादेः अनुद्भावितव्यभिचारत्वादिना दोषत्वव्यवहारतस्यनयोक्तविशेषणाद्दानेऽपि नाहेत्वाभासत्वापत्तिर्ईदृशविशिष्टस्य तद्विशेषणविशिष्टावरोधिनाथ दोषादिपदस्यानिरुक्तविशेषणावच्छिन्नात्र मूलनियतावच्छेदकावच्छिन्नाति
रूपितविषयताकत्वेनान्यथोपाधेर्दुष्टकल्पमेवोपकल्प्यत्वनेनयान्योन्याश्रयमेयत्वादिविशिष्टव्यभिचारत्वादिरूपस्यानुपस्थितत्वावच्छेदकस्यात्रविशेषणारहितत्वेनातिप्रसंगाभावादिनिर्दुष्टत्वं नत्वाख्यपातिप्रकारित्वस्यैवपक्षतावच्छे
दकाभावव्याप्तिव्यतिरेकवत्त्वादिरूपेणोक्तदोषासत्त्वाद्धेतुनिष्ठत्वपक्षेऽतिव्याप्तिरिति व्याप्यत्वासिद्धौ नव्याप्तिप्रतीतौ व्याप्तिविषयताशालिज्ञानत्वव्यापकत्वाभावादिप्रमाणप्रदर्शनस्य विशिष्टानतिरिक्ततयाऽव्याप्तिरित्याह पत्तेनेति तावद्धर्मविशेषणादानेऽप्युक्तसर्वतावच्छेदकादि
तत्त्वाद्विषयत्वादिविषयतत्वे उपनायकोनादिनवत्वादिविशिष्टत्वे दोषवत्तः कोपनयत्वाद्धि प्रतिबन्धकव्यभिचारादि यावद्विशेषकानिश्चयप्रतिबन्धकत्वेनानतिव्याप्तिरपि विशेषणस्य निश्चयस्याप्यविरोधिता विकल्प
तत्त्वदोषपक्षाविरोधमाह पत्तेनिरस्तमिति व्याप्यत्वाभावेनैवविशिष्टसत्त्वं वाकारः संपत्त्याक्रमव्याप्ति साधनवदधिकसाध्याभाववद्वृत्ति साधनमपि कत्वाव्याप्यवद्विशिष्टप्रकारकत्वानुमानपक्षव्यभिचारानुमितिप्रतिबन्धकसाध्य
नवच्छिन्नव्याप्त्याभावव्यापिसाध्यसाध्याभाववद्वृत्तित्वमुक्तमिति वैधर्म्यतयानियमतो मासतत्त्वनिरूपितव्याप्तिज्ञानप्रतिबन्धकमितिमताभिप्रायेणाहदेशान्तरेनियमनज्ञात्माभेदिमतो नास्ति व्याप्तिवैशिष्ट्यज्ञानप्रतिबन्धकतावच्छेदिका
